# ब्रह्मकृतं छिन्नमस्तास्तोत्रम् २

ChinnamastAstotram 2

sanskritdocuments.org

June 20, 2018

ChinnamastAstotram 2

# ब्रह्मकृतं छिन्नमस्तास्तोत्रम् २

## Sanskrit Document Information

Text title : ChinnamastA Stotram 2 by brahma

File name : ChinnamastAstotrambrahma.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Author : brahma

Proofread by : Lalitha Parameswari parameswari.lalitha at gmail.com, NA

Description-comments : In shAktapramoda and mantramahArNava

Latest update : June 21, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 20, 2018

*sanskritdocuments.org*

# ब्रह्मकृतं छिन्नमस्तास्तोत्रम् २

श्रीगणेशाय नमः ।
अथ स्तोत्रम् ।
ईश्वर उवाच -
स्तवराजमहं वन्दे वैरोचन्याः शुभप्रदम् ।
नाभौ शुभ्रारविन्दं तदुपरि विलसन्मण्डलं चण्डरश्मेः
संसारस्यैकसारां त्रिभुवनजननीं धर्मकामार्थदात्रीम् ।
तस्मिन्मध्ये त्रिमार्गे त्रितयतनुधरां छिन्नमस्तां प्रशस्तां
तां वन्दे छिन्नमस्तां शमनभयहरां योगिनीं योगमुद्राम् ॥ १॥

नाभौ शुद्धसरोजवक्त्रविलसद्बन्धूकपुष्पारुणं
भास्वद्भास्करमण्डलं तदुदरे तद्योनिचक्रं महत् ।
तन्मध्ये विपरीतमैथुनरतप्रद्युम्नसत्कामिन्-
पृष्ठस्थाम् तरुणार्ककोटिविलसत्तेजस्स्वरूपां भजे ॥ २॥

वामे छिन्नशिरोधरां तदितरे पाणौ महत्कर्तृकां
प्रत्यालीढपदां दिगन्तवसनामुन्मुक्तकेशव्रजाम् ।
छिन्नात्मीयशिरस्समुच्छलदसृग्धारां पिबन्तीं परां
बालादित्यसमप्रकाशविलसन्नेत्रत्रयोद्भासिनीम् ॥ ३॥

वामादन्यत्र नालं बहुगहनगलद्रक्तधाराभिरुच्चैः
गायन्तीमस्थिभूषां करकमललसत्कर्तृकामुग्ररूपाम् ।
रक्तामारक्तकेशीमपगतवसनां वर्णिनीमात्मशक्तिं
प्रत्यालीढोरुपादामरुणितनयनां योगिनीं योगनिद्राम् ॥ ४॥

दिग्वस्त्रां मुक्तकेशीं प्रलयघनघटाघोररूपां प्रचण्डां
दंष्ट्रा दुष्प्रेक्ष्य  वक्त्रोदरविवरलसल्लोलजिह्वाग्रभासाम् ।
विद्युल्लोलाक्षियुग्मां हृदयतटलसद्भोगिनीं भीममूर्त्तिं
सद्यश्छिन्नात्मकण्ठप्रगलितरुधिरैर्डाकिनीं वर्धयन्तीम् ॥ ५॥

ब्रह्मेशानाच्युताद्यैः शिरसि विनिहता मन्दपादारविन्दै-
राप्तैर्योगीन्द्रमुख्यैः प्रतिपदमनिशं चिन्तितां चिन्त्यरूपाम् ।
संसारे सारभूतां त्रिभुवनजननीं छिन्नमस्तां प्रशस्ता-
मिष्टां तामिष्टदात्रीं कलिकलुषहरां चेतसा चिन्तयामि ॥ ६॥

उत्पत्तिस्थितिसंहतीर्घटयितुं धत्ते त्रिरूपां तनुम् ।
त्रैगुण्याज्जगतो यदीय विकृतिर्ब्रह्माच्युतः शूलभृत् ॥

तामाद्यां प्रकृतिं स्मरामि मनसा सर्वार्थसंसिद्धये ।
यस्याः स्मेरपदारविन्दयुगले लाभं भजन्ते नराः ॥ ७॥

अभिलषितपरस्त्रीयोगपूजापरोऽहं
बहुविधजनभावारम्भसम्भावितोऽहम् ।
पशुजनविरतोऽहं भैरवीसंस्थितोऽहं
गुरुचरणपरोऽहं भैरवोऽहं शिवोऽहम् ॥ ८॥

इदं स्तोत्रं महापुण्यं ब्रह्मणा भाषितं पुरा ।
सर्वसिद्धिप्रदं साक्षान्महापातकनाशनम् ॥ ९॥

यः पठेत्प्रातरुत्थाय देव्याः सन्निहितोऽपि वा ।
तस्य सिद्धिर्भवेद्देवि वाञ्छितार्त्थप्रदायिनी ॥ १०॥

धनं धान्यं सुतं जायां हयं हस्तिनमेव च ।
वसुन्धरां महाविद्यामष्टसिद्धिं लभेद् ध्रुवम् ॥ ११॥

वैयाघ्राजिनरञ्जितस्वजघनेऽरण्ये प्रलम्बोदरे
खर्वेऽनिर्वचनीयपर्वसुभगे मुण्डावलीमण्डिते ।
कर्त्रीं कुन्दरुचिं विचित्रवनितां ज्ञाने दधाने पदे
मातर्भक्तजनानुकम्पिनि महामायेऽस्तु तुभ्यं नमः ॥ १२

इति ब्रह्मकृतं छिन्नमस्तास्तोत्रम् ॥

Proofread by lalitha parameswari parameswari.lalitha gmail.com

pdf was typeset on June 20, 2018

Please send corrections to *sanskrit@cheerful.com*